बृहस्पतये॰ बृहस्पतिमा॰ ॥ सर्पेभ्यः सर्पदैवत्यं ॥ नमोऽस्तु सर्पेभ्यो [illegible] येकेच पृथिवीमनु
येऽन्तरिक्षे येदिवि तेभ्यः सर्पेभ्यो नमः ५१ सर्पाः इहाग॰ छन्तु इह तिष्ठंतु सर्पेभ्यो नमः स
र्पाना॰ मि ॥ पितृभ्यः पितृदैवतं ॥ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्व
धायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः अक्षन्नपितरोमीमद
न्तपितरोतीतृपंतपितरः पितरः शुन्धध्वं ५२ पितरः इहा॰ तु पितृभ्यो नमः पितृना॰
मि ॥ भगब्रह्मणोतिभागयेतु ॥ भगब्रह्मोतर्भगसत्यराधो भगेमांधियमुदवाददन्नः भ
गप्रणोजनय गोभिरश्वैर्भगप्रनृभिर्नृवंतः स्याम ५३ भग इहाग॰ छ॰ भगायनमः भग
मा॰ ॥ दैव्यावध्वर्यवेमा ॥ दैव्यावध्वर्यू आगतं रथेन सूर्यत्वचा मध्वायज्ञं ५४ स

२५

मंत्राद्ये ४४ अर्यमन इहा० स्व ॥ ॐ अर्यमणे नमः अर्यमणमा० ॥ इत्थं विश्वाद्ये मंत्रेण ॥ वि

श्वाडिह ल्पिबतु सोम्यंमध्वायुर्दधद्यज्ञपतावविहृतं वातजूतो यो अभिरक्षति त्म

ना प्रजाः पुपोष पुरुधा विराजति ७५ सवित इहा० स्व सवित्रे नमः सवितारमा० ॥ त्वाष्टं त्व

ष्टप्रपूजयेत् त्वष्टातुरीपो अद्भुत इंद्राग्नी पुष्टिवर्द्धना द्विपदा छंद इंद्रियमुक्षा गौर्न

वयो दधुः ७६ त्वष्ट इ० स्व त्वष्ट्रे नमः त्वष्टारमा० ॥ इति दक्षिणे ॥ अथ पश्चिमे ॥ पश्चि

म द्रोति वायव्यां ॥ पीवो अन्नारयिवृधः सुमेधा श्वेतः शिशिक्ति नियुतामभिश्रीः ते

वायवे समनसो विवेत्स्वरः सपत्यानि चक्रुः ७७ वायो इहा० स्व वायवे नमः वायुमा० ॥

इंद्राग्नीच विहिदेवतं ॥ इंद्राग्नी आगतं सुतं गीर्भिर्नभो वरेण्यं अस्य पातं धियेषिता ॥

७८ ॥ इंद्राग्नी इहा० स्व इंद्राग्निभ्यां नमः इंद्राग्नी आवा० ॥ नमो मित्रेनुमैत्रं तु ॥ नमो मि

ऋस्पृवरुणस्यवत्तसेमहोदेवायत्तहृतथंसपर्येत दूरेदृशेदेवजातायकेतवेदिवस्पुत्राय
सूर्यायपश्यशंसत ४९ मित्रहृ० हृ मित्रायनमः मित्रमा० सदस्युहस्तैपुरंदरं ॥ सदस्युहस्तै
:सनिरंवगिभिर्वरीसथंस्मस्थासयुधदेद्रोगणेन सथंस्तस्पयन्सोमपावाहदस्युगधन्वा
प्रतिहितामिरस्ता ५० पुरंदरहृ० हृ पुरंदरायनमः पुरमा० ॥ मूलंमातेवपुत्रंतु ॥ मातेव
पुत्रंपृथिवीपुरीष्यमग्निथंस्वेयोनावभारुखा नांविश्वैर्देवैरृतुभिः संविदानःप्रजाप
तिर्विश्वकर्माविमुंचतु ५१ निरृतेहृ० हृ निरृतयेनमः निरृतिमा० ॥ पूर्वाषाढामपाघमः
अपाघमपकिल्बिषमपकृत्यामपोरपः अपामार्गत्वमस्मदपदुःस्वप्न्यथंसुव अपर
हा० हृ अपोनमः अपआवाह० ॥ विश्वेअद्येति विश्वेदां ॥ विश्वेअद्यमरुतोविश्वऊ
तीविश्वेभवंत्वग्नयःसमिद्धाः विश्वेनोदेवा अवसागमंतु विश्वमस्तु द्रविणंवा

२६

२८

जो॰ असमे ५३ विश्वेदेवाः इहागच्छंतु इह तिष्ठंतु विश्वेभ्यो देवेभ्यो नमः विश्वान् देवाना
वाह०॥ इति पश्चिमे॥ अथोत्तरे॥ गायत्र्याभिजितन्यसेत॥ तत्सवितुर्वरेण्यं भर्गो दे
वस्य धीमहि। धियो यो नः प्रचोदयात्॥ ब्रह्मन्निहा० ब्रह्मणे नमः ब्रह्माणमा०॥ श्र
वणे विष्णुमंत्रेण॥ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि
वैष्णवमसि विष्णवे त्वा ५४ विष्णो इ० विष्णवे नमः विष्णुमा०॥ धनिष्ठा वसुधारया
॥ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु
वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ५५ वसव इ० इह तु वसुभ्यो नमः वसू
न्० मि॥ पैत्र वारुणेन वारुण्यां॥ वरुणस्योत्तंभनमसि वरुणस्य स्कंभसर्जनी स्थो
वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि ऋतसदनमासीद ५७ वरुण

वरुणस्य।

स्यै इ० ष्ट वरुणाय: वरुणमा०॥ उतनोह्यु जपास्मं। उतनोहिर्बुध्न्यः शृणोत्वज एक

पात् पृथिवीसमुद्रः। विश्वेदेवास्तावृधोहुवाना स्तुतामंत्राः कविशस्ता अवंतु ५८ अ

जैकपद इ० ष्ट अजैकपदे० अजैकपदमा०॥ शिवोनामेत्यहर्बुध्न्यं॥ शिवोनामासिस्व

धितिष्टे पितानमस्ते अस्तु मामाहिंसीः॥ निवर्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पो

षाय सुप्रजास्त्वाय सुवीर्याय ५९ अहिर्बुध्न्य इ० ष्ट अहिर्बुध्न्याय नमः अहिर्बुध्न्यमा०

पौष्णं पूषंतवे नतु॥ पूषन्तव व्रते वयं न रिष्येम कदाचन स्तोतारस्त इह स्मसि ६० पूषन्

इ० ष्ट पूष्णे नमः पूषणमावा०॥ योगे योगे ति इशान्यां योगानैवेकपुंजके॥ योगेयोगेतव

स्तरं वाजे वाजे हवामहे सखाय इंद्र मूतये॥ बर्हिरिशान्यां विः कुंभादियोगाः इहागच्छं

तु इह तिष्ठंतु योगेभ्यो नमः योगानावा०॥ ईशं ऐंद्रकरौति चाग्नेयां कर्णानैवेकपुंज

३१

27

के भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्
तनूभिर्व्यशेम देवहितं यदायुः ६१ मंडलाद्दहिराग्नेये बवादिकरणैः स्थाग ठं
तुद्दहाति हितु बवादिकरणेभ्यो नमः बवादिकरणाना० मि ६१ ध्रुवासीति ध्रुवं मध्ये
ग्रहाणां वसतारकं ॥ आदित्यमंडले चैव वामे देवाधिदेवयोः ॥ ध्रुवासि ध्रुवोयं
यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् घृतेन द्यावापृथिवी पूर्येथामिंद्रस्य
छदिरसि विश्वजनस्य छाया ६२ आदित्यमंडले उत्तरे ध्रुवमंड० ध्रुवाय नमः
ध्रुवमा० ॥ पंचनद्येति सरितः पंचनद्यास्तु पश्चिमे ॥ पंचनद्यः सरस्वतीमपियंति
सस्रोतसः सरस्वती तु पंचधा सो देशेऽभवत्सरित् ॥ सूर्यात्पश्चिमे शनिमंडलेसरि
तद्दहा० घृ ॥ सरिद्भ्यो नमः सरितमा० ॥ समस्तपितृस्थानं तरं गुरुसूर्ययोः ॥ स

मृस्त्वय: प्रतिहिता: शरीरे सप्त रक्षंतिसदमप्रमादं सप्ताय: इहागच्छंतु सप्तऋषयो

स्वपतोलोकमीयुस्तत्रजागृतो अस्वप्नजौसत्रसदौचदेवौ ६५ गुरुसूर्ययोर्मध्येसप्त

ऋषय: इहागच्छंतु ० सप्तऋषिभ्योनम: सप्तऋषीनावाहया० ॥ इमंमेसागरानूसप्त

सरित्तोयप्रपूजयेत् ॥ इमं मे वरुणश्रुधीहवमद्याच मृडय त्वामवस्युराचके इह

सूर्योत्यग्निमेशनिमंडलेशरित्तोध: सप्तसागरा: इहागच्छंतु इहतिष्ठंतुसागरेभ्यो

नम: सागराना० ॥ प्रवर्ततेतिमंत्रेणउत्तरां दिशि पर्वतान् ॥ पंक्तिनक्षत्रयोर्मध्ये

पत्रवाह्येतथैवच ॥ प्रपर्वतस्यवृषभस्यपृष्ठान्नावश्चरंतिस्वसिचईयाना: ताआ

ववृत्रंनधरागुदक्ता अहिर्बुध्न्यमनुरीयमाणा: ॥ विष्णोर्विक्रमणमसि विष्णो

र्विक्रांतमसि विष्णो: क्रांतमसि ६७ पर्वता: इहागच्छंतु० ॥ पर्वतेभ्यो नम: पर्व

ते २

२८

28

तानमा०॥यवोयस्तेतिरैवंतस्याप्ययेतन्मे एनोप्पध:॥यवोयस्तेवाजिन्निहितोगुहायः।

श्येनेपरीतो-अचरच्चवाजिनेनोवाजिनवलवान्वलेनवायजिघ्रमव्रमनेवपार

यि ष्णुः वाजिनोवाजितोवाजषसरिष्यतोवृहस्पतेर्भागमवजिघ्रत ६८ रैवतः ०ऋ

रैवतायनमः रैवतमा० सुपर्णोसीतिगरुत्मानुनरेवुधमेदले॥सुपर्णोसिगरुत्मां

स्त्रिवृत्तेसिरोगायत्रंचक्षु रहद्रथंतरे पक्षौ स्तोमआत्मा छंदांसगानि यजूंषिना

मसामतेतनुर्वामदेव्यंयज्ञायज्ञियंपुच्छंधिष्ण्या शफाःसुवर्णोसिगरुत्मान्दिवंगछ

स्व ॐपत ६९ गरुत्मान्निहा० ॐ गरुत्मतेनमः गरुत्मंतमा०॥ अत्रीवसरेरुद्रकल

शास्थापनं॥भूरसीतिभूमिरस्पृष्टा॥भूरसिभूमिरस्यदितिरसिविश्वधायायावि

श्वस्यभुवनस्यधर्त्रीपृथ्वीमजरुपृथिवींदृंहपृथिवीमाहिंसीः ७० धान्य

मसीति धान्यं धत्वा॥ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्र
सितिमायुषे धां देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना ७१ आ
जिघ्र कलशमिति कलशस्थापनं आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः पुनरूर्जा निवर्तस्व
सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः वरुणस्योत्तम्भनमसीति जलंपूर्य
:॥ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋत
सदनमसि वरुणस्य ऋतसदनमासीद ७३ या ओषधीत्योषधीप्रतिष्ठा॥ या ओषधीः
पूर्वा जाता देवेभ्यस्त्रियुगं पुरा मनै नु बभ्रूणामहं शतं धामानि सप्त च ७४ अश्वत्थे वे
ति पक्वान्नं हित्वा॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता गोभाज इत्किल असथ यत्स
नवथ पूरुषं ७५ परिवाजपेति पेचरत्नं निहित्वा॥ परिवाजपतिः कविरग्निर्हव्यान्यक्र

मीत्त् स्वधदृत्तानिराम्रुषे ७६ या: फलिनिरिति फलं॥ या: फलिनीर्या अफला अपुष्पायाश्चपु

ष्पीणी: वृहस्पतिप्रसूतास्तानोमुंचत्वं हस: ७७ हिरण्यगर्भेति मुद्रां प्रनंहिरण्यगर्भ:

समवर्ततांग्रेभूतस्यजात: पतिरेक आशीत् सदाधार पृथिवीं द्यामुते मां कस्मैदेवाय ह

विषाविधेम॥ ७८ सुज्ञातोज्योतिरवेति वस्त्रेणवेष्टनं॥ सुज्ञातोज्योतिषासह शर्मवरूथ

मासदत्स्व: वासो अग्नेविश्वरूपं संव्ययस्वविभावसो ७९ पूर्णादर्वीत्युपरिष्टात्पूर्णं

पात्रं॥ पूर्णादर्वी परापतसुपूर्णापुनरापत॥ वस्नेव विक्रीणावहादृषमूर्जं शतक्रतो ८०

श्रीफलंगृहीत्वा॥ रूपंदेहिजयंदेहि भाग्यंभगवन्देहिमे पुत्रान्देहि धनंदेहि सर्वान्का

मांश्चदेहिमे फलेनफलितंसर्वं त्रैलोक्यंसचराचरं फलस्यार्घ्यप्रदानेनफला: सन्तु म

नोरथा: श्रीफलेनस्यापरिमुक्ता॥ आसंरव्यातेति संपूज्याद्दानद्दाक्षं भसि॥ आसं

ख्याता सहस्राणि ये रुद्रा अधिभूम्यां ते षां० रुद्र इ० रुद्राय० मि॥ प्रजापतेरग्निभागे
शानि मंडले केशुभे पूज्यो विष्णुः स्वसूक्तेन योद्दशार्चेन तद्वत्॥ सहस्रशीर्षा पुरुषः स
हस्राक्षः सहस्रपात् सभूमिं० सर्वतस्पृत्वात्यतिष्ठद्दशांगुलं॥ अनुवाकः॥ विष्णोरिहा०
इ विष्णवे० विष्णुमा०॥ वास्तोष्पते नि वास्तूनां नैरृत्यां राहुमंडले॥ वास्तोष्पते प्रति जानी
ह्यस्मान्स्वावेशो अनमीवो भवा न यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतु
ष्पदे॥ वास्तोष्पते रिहा० इ वास्तोष्पतये० वास्तोष्पतिमा०॥ गणानां त्वेति वायव्यां गणे
शो केतुमंडले॥ गणानां त्वा इ० गणपतिरिहा० गणपतये० मि॥ महाग्नेयां सोमदले रुद्राणा
मग्नि भागतः॥ नमोस्तु सर्पेभ्यः इति क्षेत्रपालं प्रपूजयेत्॥ नमोस्तु सर्पेभ्यो ये० इ क्षेत्र
पालइ० क्षेत्रपालाय० मि॥ रुद्रकुंभाग्नतः पूज्य चामुंडा जातवेदसे० जातवेदसे इ० चामुंडे इ०

३०

30

चामुंडायै॰मि॰ग्रहाद्दक्षिणदिग्भौमस्य नैरृत्यमुखाद्धः॥ ॐ वः शिवेतिगौर्यो द्दिमा तरक्षे
कपुंजके॥ ॐ वः शिवतमो रसस्तस्य भाजयते ह नः उशतीरिव मातरः ८८ मातरः इहागा
च्छंतु इह॰ तु गौर्यादि षोडशमातृभ्यो नमः मातृ रावा॰॥ अथ ग्रहस्थापनं॥ सूर्यादि पू
र्वदिग्भागे अग्निमीले सूचांतया॥ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं॥ होतारं
रत्नधातमं॥ ऋग्वेद इ॰ ऋग्वेदाय॰मि॰॥ ८८॥ इषेत्वेतियजुर्वेदं सूर्याद्दक्षिणतो न्य
सेत् इषेत्वोर्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्व
मघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ईशत माघशंसो ध्रुवा अस्मि
न् गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ९० यजुर्वेद इ॰ यजुर्वेदाय॰मि॰॥ सूर्या
त्पश्चिमे साम अग्न आयाहीति मंत्रतः॥ अग्न आयाहि वीतये गृणानो हव्यदातये।

निहोतासत्सुबर्हिषि ॥९॥ सामवेदं इ० सामवेदाय० सामवेदमा० खेदत्तरभागे तुशन्नोदेवीरथ

र्ववणे ॥ शन्नोदेवीरभिष्टय आपोभवंतु पीतये शंयोरभिस्रवंतु नः ॥ अथर्ववेदं इ० अ

थर्ववेदाय० मि ॥ अथदिक्पालस्थापनं ॥ पूर्वादितः क्रमादिक्षुदिं द्रादीनथपूजयेत् ॥

अंतरीक्षं पूर्वभागे धरा पूज्या हि पश्चिमे ॥ इंद्रं त्रातारमंत्रेणत्वन्नोअग्ने हुताशनं यमंसु

गन्नपंथेति असुन्वंतेति नैऋतिः तत्वायामिवरुणं घ्रस्तेवायुमानोनियुद्भिः ॥ वयंसोमेति

धनदंतमीशानेति शंकरं ॥ अस्मे रुद्रेत्यंतरिक्षं स्योनापृथिवि मोधरां ॥ त्रातारमिंद्रमवितार

मिंद्रं हवेहवे सुहवं शूरमिंद्रं ह्वयामि शक्रं पुरुहूतमिंद्रं स्वस्तिनोमघवाधात्विंद्रः

॥१॥ पूर्वे इंद्रं इ० इंद्राय० ॥ त्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठो

वह्नितमः शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत् ॥ आग्नेय्यांहुताशनं इ० हुताशनाय० २

३१
31

सुगंन्नपंथांप्रदिशन्नएहिज्योतिष्मध्येह्यजुरन्नऽआयुः ऽअपैतुमृत्युरमृतंमऽआगाद्वैवस्वतो
नोऽअभयंकृणोतुनः स्वाहा ३ इदंदक्षिणेयमइ० यमाय०॥ ऽअसुन्वंतमयजमानमिच्छस्तेनस्ये
त्यामन्विहितस्करस्य ऽअन्यमस्मदिच्छसात इत्यानमोदेवी निर्ऋते तुभ्यमस्तु ४ निर्ऋतिइ०
निर्ऋतये०मि॥ तत्त्वायामि ५ ममग्निमेवरुणइ० वरुणाय०मि॥ ऽआनोनियुद्भिः शतिनीभि
रध्वरं६ सहस्रिणीभिरुपयाहियज्ञं वायोऽअस्मिन्त्सवनेमादयस्वयूयंपात स्वस्तिभिः
सदानः॥६॥ वायव्ये वायोइहा० वायवे० वायुमा०॥ वयंसोमव्रतेतववस्तनूषु बिभ्रतः
प्रजावन्तः सचेमहि ७ उत्तरे कुबेरइ० कुबेराय० मि॥ तमीशानंजगतस्तस्थुषस्पतिं
धियंजिन्वमवसेहूमहेवयं॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये
८ ईशान्यांरुद्रइ० रुद्राय० रुद्रमा० ऽअस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसं०

जोएवाः यःशर्थसतेस्कवतेधायियजरंद्रजोष्टा अस्मान्अवंतुदेवाः ९ ॐ हुवेव्र सनिहा॰
व्र ह्मैरणे॰मि॰ स्योनापृथिविनोभवान्टत्तरा निवेशनी यच्छान:शर्मसप्रथाः १० अवंतद॰
ष्ट अधअनताय॰ अनंतमा॰ एवंगृहस्थापनकृत्वाप्रतिष्ठांकुर्यात ॥ ॐ तद्दस्तमित्रावरु
णातदग्नेशंयोरस्मभ्यमिदमस्तुशस्तं असीमहि गाधमुतप्रतिष्ठांनमोवृहतेसादनाय
१ मनोजूतिर्जुषतामाज्यस्यवृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञंसमिमंदधातुविश्वेदे
वासइहमादयंतामोंप्रतिष्ठ २ एषवैप्रतिष्ठानामयज्ञोयत्रेतेनयज्ञेनयजंतेनसर्वमेव
प्रतिष्ठितंभवति ॥ सूर्योरयोग्रहाः स्थापितदेवताग्रहकलससहिताःसमंडपाःसुप्रतिष्ठिता
वरदाभवंतु यजमानःपूजांकुर्यात ॥ आचम्य ॥ अद्य॰ ग्रहयज्ञांगभूतग्रहकलशपू
र्वकग्रहाणांस्थापितदेवतानांपूजनमहंकरिष्ये ॥ ग्रहकलशायनमः इदमर्घादिपूजास

३२

मास्य ॥ आदित्यादिनवग्रहदेवताभ्यो नमः नवग्रहमंडलमध्यस्थदेवताभ्यो नमः ॥ आसनं
पाद्यं ॥ अर्घ्यं ॥ आचमनं ॥ स्नानं ॥ वस्त्रं ॥ आभरणं ॥ गंधं ॥ पुष्पाणि ॥ अक्षतान् ॥ धूपं
॥ दीपं ॥ नैवेद्यं ॥ आचमनं ॥ फलं ॥ दक्षिणां ॥ आरार्तिकं ॥ पुष्पांजलिं तत्र मंत्रः ॥ महाराज्यं
प्रयच्छेति महाराज्यं हरेति च ॥ ग्रहैस्त्वैर्व्यापितं सर्वं त्रैलोक्यं सचराचरं इति पुष्पांजलिं
प्रदक्षिणां ॥ नमस्कारः ॥ अद्य ग्रहाणां पूजनकर्मणि यन्न्यूनमधिकं तत्सर्वं भवतां ब्राह्म

ॐ ५

णानां वचनात् श्री आदित्यादिनवग्रहाणां प्रसादात्सर्वं विधिं परिपूर्णतामस्तु ॥ ततः आ
चार्यः स्थंडिले आघात्यस्नुते चरौ स्रुवः प्रतपनं ॥ तद्यथा ॥ स्रुवस्य प्रागग्रस्याऽवाङ्मु
खस्याग्नौ प्रतपनमुत्तानस्य संमार्जनं कुशैरग्रतो ग्रान्मूलपर्यंतं ॥ मध्यैरेव मध्या
दग्रपर्यंतं ॥ मूलैरेव मूलाद्ग्रपर्यंतं संमार्जनं ॥ प्रणीताद्भिरभ्युक्षणं ॥ पुनः प्रतप

नं॥ आस्तरनं बर्हिषि स्रुवपुरतः प्रागग्रस्य स्थापनं दक्षिणतो निदध्यात्॥ स्रुचेरपि ए
वं॥ पाके हस्ते स्रुवमाज्यमुद्वास्य चरोः पूर्वमग्नेः पश्चिमे नीत्वा प्रणीतोत्तरतः प्रथमं
निधाय॥ चरुं तथैवोद्वास्याज्यपश्चिमे नीत्वाज्योत्तरे निधाय॥ स्रुवपुरतः स्रुचो वोत्तरे आ
ज्यस्योत्तरतश्चरुं निधाय एवमन्यानि चित्चतुरादीनि हवींष्युद्वासयेत्॥ अग्नेः श्रितानां
तु पूर्वेणोद्वासितानां तु पश्चिमेनो हवींष्युद्वास्याऽनयनमिति याज्ञिकसंप्रदायात्॥ प्रोक्षणी
तः पवित्रे समानीय॥ आज्ये प्रोक्षणीवदुत्पवनं पवित्रे प्रोक्षण्यां निधायाज्यमवेक्ष्य सत्य
पद्रवेतं निरस्य प्रोक्षण्युत्पवनं विधाय होमसमाप्तिपर्यन्तं॥ उपयमनकुशैर्वामहस्ते उपगृ
ह्य विधाय॥ प्रजापतिं चिंतयन्नुत्तिष्ठन्नाघारघृताक्तसमिद्द्वयं प्रक्षिप्योपविश्य॥ प्रोक्षणी
भिः सह विकृतमग्निं प्रणीतासु स्रुवसहितं प्रोक्षण्युदकेन सपवि॰ त्रेण दक्षिणावुलकर

३३

33

आ

हीतिनइत्तरानादि उदकपर्यंतं एषो हि देववरिति पर्युक्ष्य ॥ पवित्रे प्रणीतासु निधाय
प्रोक्षणीपात्रं स्वस्थाने निदध्यात् ॥ होमशेषः संस्त्रवं तस्य धारणं प्रोक्षणी वा प्रणीतासु वा ॥
आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं स्विष्टकृच्चैव नित्यं सर्वत्र दक्षिणं जा
नुं सर्वत्र ब्रह्मान्वारब्धे सति होतव्या ॥ तद्यथा ॥ ब्रह्मणा करबर्हिषान्वारब्धो दक्षिणं जा
नुं नमयित्वा प्राक् उत्तरं ज्ञेयं दक्षिणभागे मनसा ॐ प्रजापतये स्वाहा ॥ इदं प्रजापतये
॥ अग्नेरुत्तरभागे इंद्राय स्वाहा इदमिंद्राय ॥ तत उत्तरपूर्वार्द्धे ॐ अग्नये स्वाहा इदम
ग्नये ॥ ततो दक्षिणपूर्वार्द्धे ॐ सोमाय स्वाहा इदं सोमाय ॥ इत्याघारावाज्यभागौ संस्त्रवं
हुत्वा ॥ पुनरग्निं शांडिल्यगोत्रं शांडिल्यासितदेवलेति त्रिप्रवरं अरणी मातरं वनस्पतिं पित
रं पूजयेत् ॥ शांतिके वरदनाम्ने वैश्वानराय नमः पूजनं ॥ ततो यस्मिन्कर्मणि यावं

३

तं प्रधानाहुतयः स्तोत्रं विहुत्वा तद्यथा॥ प्रथमं ग्रहाणां स्थापित देवतानांच॥ समिधा

ज्यंचरु होमस्तिल होम क्रमेणतु॥ तत्र समिध काष्ठ प्रमाणं॥ अर्कपलाशखदिरो अपामा

र्गोश्वपिप्पलः औदुंबरशमी दूर्वा कुशा कोत्समिध क्रमात॥१ अलाभे तु प्रकर्तव्याः स

र्वो पालाशसंभवाः॥ प्रतिग्रहं व जुहुयाद्रुत मष्टोत्तरं तथा २ अष्टाविंशति रष्टौवायजे

त्संचामृतप्लुता॥ अथ सूर्यादि ग्रहाणां मंत्राः॥ आकृष्णेन रजसे इदं मं देवे॥ति वृम्मा अ

ग्निर्मूर्द्धेति भौमस्य उद्बुध्येति बुधस्य च १ बृहस्पते ति जीवस्य शुक्रस्या न्नात्परि स्रुतः॥

शन्नो देवीशनेर्मंत्रं कयानचित्र राहवे २ केतुं कृन्वन्न केतुनां एते ग्रहाः प्रमाणतः॥३॥ सु

चिमध्ये हविर्दत्वा अभिघार्यः॥ ओं आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं म

र्त्यंच हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा॥ सूर्याय इदं न मम १

३४

34

ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रिया
य इमममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वोमी राजा सोमोस्माकं ब्राह्मणानाꣳ राजा
स्वाहा ॥ इदं चन्द्राय इदं न मम ॥२॥ ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं ॥ अपाꣳ रे
ताꣳसि जिन्वति स्वाहा ॥ भौमाय इदं ॥३॥ ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स
ꣳसृजेथामयं च अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत स्वाहा
४ बुधाय इदं ॥ ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीद
यच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रं स्वाहा ॥ गुरवे इदं ५ ॐ अन्नात्परि
स्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्र
मन्धस इन्द्रस्येन्द्रियमिदं पयोमृतं मधु ॥६॥ स्वाहा शुक्राय इदं ॥६॥ ॐ शन्नो देवीरभि

पार

हृय आपोभवंतु पीतयेशंयोरभिस्रवंतुनः स्वाहाशन्नयेइदं ॥७॥ ॐकयानश्चित्र

आभुवदूती सदावृधः सखाकयाशचिष्टयावृता स्वाहाराहुवेइदं ॥८॥ ॐकेतुंकृण्वन्नके

तवेपेशोमर्या अपेशसेसमुषद्भिरजायथाः स्वाहाकेतवेइदं ९ एतानवाज्याहुतयः

एताएवनवतिलाहुतयः ॥ अन्या अतिलाहुतयस्तत्रत्यागार्थंसंकल्पः ॥ अ० त्वाद्य० अ

नेनसंपादितेनहवनीयद्रव्येणयथावत्प्रमाणादेवताभ्यः इदंहवनीयद्रव्यंमयाप

रित्यक्तंनमम ॥ आचार्यऋत्विग्भ्यश्चयथाक्रमेणद्व्याहुतिहोमंकुर्यात् ॥ ॐअग्निर्दूतं

१० अग्नेत्वग्ने ११ स्योनापृथिवी १२ इदंविष्णु १३ महाँइन्द्रो १४ मुक्तमुपांतिम्न १५ प्रजोप

ते १६ आयंगो १७ ब्रह्मयज्ञानं १८ अ्नेनक १९ श्रीश्चते २० यदक्रंद २१ विसोरराट

२२ आब्रह्मन् २३ सजोषा २४ यमायत्वा २५ कार्षिरसि २६ चित्रावसो २७ सनपते २८

एताएवन
वचत्वाऊन
यः २

३५

आपो अग्ने घ्नान् २९ चिदसितयाऽ ३० इदं विष्णु ३१ इंद्र आसान् ३२ इंद्रं देवी ३३ प्रजायते ३४
नमो स्त्व सर्पेभ्यः ३५ ब्रह्मयज्ञानं ३६ गणानां त्वा ३७ जातवेदसे ३८ यामो येते ३९ घृतंघृ
तपावा ४० याचां कया ४१ अग्निना तेजसा ४२ यमायत्वा ४३ अयमग्ने ४४ ब्रह्मपतानं ४५
सोमो धेनुं ४६ नमस्ते रुद्र ४७ अदितिर्द्यौ ४८ वाचस्पतये ४९ नमोऽस्तु सर्पे ५० पितृभ्यः ५१
भगप्रणेतः ५२ इदं आवहुर्युं ५३ विभ्राड् ५४ त्वष्टा तुरीप ५५ पीवो अन्नां ५६ इंद्राग्नि आ
गतं ५७ नमो मित्रस्य ५८ सद्यपुरुहूतं ५९ मा तेव पुत्रं ६० अपां ह्य म ६१ विश्वे अद्य ६२ तत्सवि
तु ६३ विष्णोरराटं ६४ वसोः पवित्रं ६५ वसल्तोसोमं ६६ उ नमो हि ६७ शिवो नामा ६८ पूर्वं
नव ६९ योगे योगे ७० भद्रं कर्णेभि ७१ आ गाहि ७२ पंचनद्य ७३ सप्तऋषयः ७४ इमं मे ७५
प्रपर्वतस्य ७६ यद्वायनि ७७ सुपर्णोसि ७८ अप्सु ते त्वा पाता ७९ सहस्रशीर्षा ८० वास्तोष्पते ८१

गणानांत्वा ८२ नमोस्तु सर्पे ८३ जातवेदसे ८४ योवः ८५ अग्निमीले ८६ इषेत्वा ८७ अग्न
आयाहि ८८ शन्नोदेवी ८९ आतारमिंद्रं ९० त्वन्नोअग्ने ९१ मुगान्नु ९२ पेयो ९३ असुन्वं तव
तत्वायामि ९४ आनोनियु ९५ वषट्सोमं ९६ तमीशानं ९७ अस्मेरुद्रा ९८ स्योना पृथिवी ९९
यथादेवतं स्वागोऽऊहनीयः॥ ततो लक्ष्मी होमः॥ तंडुलाज्यं दुग्धशर्करा॥ अमृतरूपेणाग्नि
प्वते मनसः काममाप्नी सूक्तेन च होमः कार्यः॥ सर्वेभ्यो हविर्भ्यः स्विष्टकृद्धोमः॥ स्रुचमु
पस्तीर्य हुतशेषान्सकृद्द्वावदानं द्विरभिघारणं॥ अग्नये स्विष्टकृतये स्वाहा इदमग्नये
स्विष्टकृतये॥ ततः प्रायश्चित्ताहुतयो नवसंख्याकाः॥ ॐ भूः स्वाहा इदमग्नये॥ ॐ भुवः
स्वाहा इदं वायवे॥ ॐ स्वः स्वाहा इदं सूर्याय॥ ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽव
यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांसि प्रमुमुग्ध्यस्मत् ५ स्वाहा

३६
36

इदमग्नि वरुणाभ्यां न मम ॥ ॐ स त्वन्नो अग्नेवमो भवोती नेदिष्ठो अस्य उषसो व्युष्टौ
अवयक्ष्म णो वरुणं रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्नि वरुणाभ्यां
॥५ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया असि ॥ अयानो यज्ञं वहास्यायानो धेहि
भेषजं स्वाहा इदमग्नये अयसे ॥६ ॐ ये ते शतं वरुणा ये सहस्रं यज्ञियाः पाशा महान्तः वितता४
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा ॥ इदं वरुणाय सवित्रे
विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यो न मम ॥७ उदुत्तमं वरुण पाशमस्मदवाध
मं वि मध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इ
दं वरुणायादित्यादितये न मम ॥८ मनसा प्रजापतये स्वाहा प्रजापतय इदं न मम ॥
९ ॥ होमान्ते महागणेश पुनः पूजनं कृत्वा ॥ ततो दिक्पूजा बलिदानं माषभक्तबलीदीप

सहितेनबलिनांपूजयेत॥ अहोइंद्रगजेंद्रस्य वज्रहस्तप्रपूजितः त्रातार। मिंद्रमंत्रे
णप्राचीरक्षतुदिक्पते॥ त्रातारमिंद्रमवितारमिंद्र७ हवेहवेसुहवंशूरमिंद्रं ह्व
यामिशक्रंपुरुहूतमिंद्र७ स्वस्तिनोमघवाधात्विंद्रः॥१॥ पूर्वेंद्रायनमः इंद्रस्यानु
चरेभ्योनमः इदमन्नंचंदनंचपुष्पंभोइंद्र दिशिरक्षबलिंभक्षयजमानस्याऽभ्युदयं
कुरुयजमानस्यआयुःकर्ताक्षेमकर्ताशांतिकर्तापुष्टिकर्तातुष्टिकरस्तावरदोभव॥
अहोसप्तार्चिमेषस्यहव्यवाहनपूजितः त्वंनोअग्नेतिमंत्रेणरक्षाग्नेयांदिशिपूते
त्वन्नोअग्नेवरुणस्य आग्नेयामग्नयेनमः आग्नेयानुचरेभ्योनमः इदमन्नंभो
अग्नेदिशिरक्षबलिंभक्षअभव॥२॥ अहोमहिषमारूढदंडपाणिवरप्रदः पूज्यःसु
गन्धपुष्पैश्चदक्षिणांदिशिपालकः सुगंधपुष्पधार्द्रहस्तिराणायमायंयमस्यानुचरे।

३१
37

भ्यो नमः इदम॰ भो यम दिशं रक्ष। बलिं भक्ष यजमानस्या॰ आयुः(ष्याः) भवेतु ३ अहो नैरृत्य

दिक्पाल नैरृत्य खड्गधारकः आगच्छ कौशिकारूढ असुन्वं तेनाति पूजितः॥ असुन्

न्वेत॰४ नैरृत्याय निरृतये॰ नैरृत्यस्यानुचरेभ्यो नमः इदम॰ भो निरृते दिशं रक्ष बलिं

भक्ष यजमानस्यायु॰ भव ५ अहो वरुण वारुण्यां मकरवाहि समाश्रितः आर्चितः पा

शहस्तस्य तत्वायामीति मंत्रतः॥ तत्वायामि॰ पश्चिमे वरुणाय॰ वरुणस्यानुचरेभ्यो

नमः इदमत्रवं॰ भो वरुण दिशं रक्ष बलिं भक्ष यजमानस्यायुः कुरु यजमानस्या

॰भव ५ अहो वायव्य दिक्पाल मृगवाहि समाश्रितः आनो नियुद्भिमंत्रेण वायवीरक्ष

पूजितः आनो नियुद्भिः इ॰ वायव्यां वायवे वायोरनुचरेभ्यो नमः इदमत्र॥ भो वा

यो दिशं रक्ष बलिं भक्ष यजमानस्यायुः इयं कुरु॰ भव ६ अहो नरविमानस्य गदापा

णिवरप्रदः कौवेरीच दिशं रक्षत्वयं सोमेति पूजितः॥ वयर्ठ सो० ७ उत्तरे कुवेराय कुवेरा
नुचरेभ्यो नमः इदमन्नं भो कुवेर दिशं रक्षत्व बलिं भक्ष यज० भव॥७॥ ॐ महो वृषभमारूढ
शूलं पाणि वरप्रदः रुद्रास पूजितो रक्षत्वमीशाने तिमंत्रतः॥ तमीशानो॥ ८॥ ईशानाय न
मः ईशानस्यानुचरेभ्यो० इदं० पं॥ भो ईशान दिशं रक्ष बलिं भक्ष यजमा० भव ८॥ पूर्वे
शानयोर्मध्ये॥ ॐ महो हंसमारूढ ब्रह्मन व्योम रक्ष तु दिक्पते कमंडलुधरः साक्षी ॐ मेरु
रु द्वेति पूजितः॥ ॐ मेरुद्रा ९ ॐ ऊर्ध्वं ब्रह्मणे नमः ब्रह्मणस्यानुचरेभ्यो नमः इदमन्न० पं
भो ब्रह्मन् दिशं रक्ष बलिं रक्ष यजमानस्याभ्युद० भव॥९॥ पश्चिम वायु मध्ये॥ ॐ महो गरुड
मारूढ शंखचक्र गदाधरः पलाया घोदिशं विष्णो स्यानाप्ध्यि विमंत्रतः॥ स्या नो पृथि
वी १० ॐ अधः अनंताय नमः अनंतस्यानुचरेभ्यो नमः इदमन्न० ॥ भो अनंत दिशं रक्ष ब

३८ 38

लिंमन्त्रयजमानस्य भव॥ १० ततश्चतुर्वर्तिंयुतमहीदीपसहितमाषभुक्तिं शष्कुलीं सूर्पं पा

त्रे धृत्वा निःस्तत्यां दिशि गत्वा॥ ॐ ह्रींकाराय स्वाहा हिंकृताय स्वाहा क्रंदते स्वाहा प्रोथते

स्वाहा पप्रोथाय स्वाहा गंधाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा संदि

ताय स्वाहा वल्गते स्वाहा सीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कू

जते स्वाहा प्रबुद्धाय स्वाहा वीजृंभमाणाय स्वाहा विचृत्ताय स्वाहा संहानाय स्वाहोपस्थि

ताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ११ यते स्वाहा धावते स्वाहोद्द्रवाय स्वाहोद्द्रुताय

स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषन्नाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा ब

लाय स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा वि[illegible]ताय स्वाहा। २घृ

शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा नि

मेखायस्वाहाजरत्तितस्मैस्वाहायात्पिबन्तितस्मैस्वहायमूत्रंकरोतितस्मैस्वाहा कुर्वतेस्वा
हाकृतायस्वाहा १२ मंत्राभ्यांहेत्राधिपेशायनमः हेत्राधीशानुचरेभ्योनम इदमन्त्र·ध्वंभो
हेत्राधीशइदंस्वतिं मत्तममयजमानस्यायुःकर्त्ता·भव·शांतिः३ हस्तौपादौप्रक्षाल्या
चम्यअग्निमुपेयात्॥ततःपूर्णाहुतिंकुर्यात् आज्यस्थाल्यामाज्यंनिर्वापः आज्याधिश्र
यणं॥स्रुक्स्रुवौप्रतप्यसंमज्यपुनःप्रतप्यनिदध्यदद्यात्॥आज्यमुद्वास्यउत्पूयावेक्ष्य
अपद्रव्यनिरसनंद्वादशगृहीतमाज्यंस्रुचेपूरयित्वा॥ तदुपरिधृत्तपूर्णंश्रीफलंवस्त्रा
भिमुखंबद्ध्वा॥पूर्णाहुत्यांमृड नाम्नेवैश्वानरायइदंमन्त्र·॥पूर्णाहुतिपूजनं॥राकोनपेवा
शा१६१२ ॰रुद्रेणोभ्यश्चइदमन्त्र·॥ ततस्रुवांसोस्रुचंगृहीत्वोत्थायस्रुचिमूलेनाभिमूलेधृत्वाघृतेना
नविछिन्नधारयामग्नौपातयन्॥ॐचितिंजुहोमिमनसाघृतेनदैवोयथादेवाइहागमन्त्वी

३९
३९

।ति होत्रा स्व ता वृधः पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे विश्वाहा दाभ्यं हविः १ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि सप्त होत्राः सप्तधा त्वा यजन्ति। सप्त होनीरा पृणस्व घृतेन स्वाहा २ शुक्र ज्योतिश्च चित्र ज्योतिश्च सत्य ज्योतिश्च ज्योतिष्मांश्च शुक्रश्च ऋतपाश्चात्यं हाः ३ ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च मितश्च संमितश्च सभराः ४ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च विधर्ता च विधारयः ५ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च अन्तिमित्रश्च दूरे अमित्रश्च गणः ६ ईदृक्षास एतादृक्षास ऊषुणः सदृक्षासः प्रतिसदृक्षास एतन मितासश्च संमितासो नो अद्य सभरसो मरुतो यज्ञे अस्मिन् ७ स्वतवांश्च प्रघासी च सान्तपनश्च गृहमेधी च क्रीडी च शाकी चोज्जेषी ८ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।। घृतेन त्वं तन्वं वर्धयस्व सत्याः

सेतु यजमानस्य कामाः स्वाहा ॥ श्रीफलमात्मामि मुखं जुहुयात् ॥ वसोः पवित्रमसीति वसोर्धारां
कारयेत् ॥ अथ वा इंद्रैर्देवी रित्यनुवाकेन यावद्रध्यास्मसमप्र इति पठित्वा वसोर्धारां कुर्यात्
घृते च ॥ रुद्रकलशोत्यागः ॥ मरुद्गणेभ्यो नमः ॥ भस्म बंधनं ॥ त्र्यायुषं जमदग्नेर्ललाटे क
श्यपस्य त्र्यायुषं ग्रीवायां ॥ यद्देवेषु त्र्यायुषं दक्षिणे स्कंधे तन्नोस्तु त्र्यायुषं वामस्कंधे ।
शतायुषी शिरसि ततो ग्निं प्रार्थयेत् चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव हूयते च पुनर्द्वाभ्यां
तस्मै यज्ञात्मने नमः १ स्वस्ति श्रद्धां च मेधां च विद्यां बुद्धिं श्रियं बलं आयुष्यं तेजमारोग्यं दे
हि मे हव्यवाहन: २ ततो होमसंकल्प ॥ आघारादि पूर्णाहुति पर्यंतं यद्यद्द्रव्यं यावद्यावत्सं
ख्याकं येन येन मंत्रेण यथाकामनया यस्मै यस्मै देवतायै हुतं तत्तद्द्रव्यं तावत्संख्याकं तेन
तेन मंत्रेण तर्पतयाकामनया तस्मै तस्मै देवतायै सहुतमस्तु सा सा देवता: प्रियंता ॥ ते देवा:

५०

शांतिरस्तु पुष्टिरस्तु तुष्टिरस्तु वरदा भवंतु॥ ग्रहजापकेभ्यो ग्रहतुष्टै दानानि॥ धेनुः शंखो व
षभ्येव कांचनं पीतवस्त्रं श्वेताश्व सुरभी कृष्णा लोहं छाग अस्त्र दक्षिणा॥ ॥ संस्रवः
प्राशनं॥ आचमनं॥ पवित्राभ्यां मार्जनं॥ ॐ सुमित्रिया न आप ओषधयः संतु इति मंत्रेण
शिरः प्रभृति मार्जनं॥ ॐ दुर्मित्रिया न आप ओषधयः संतु यो स्मान्द्वेष्टि यं च वयं द्विष्मः॥ इ
ति मंत्रेण प्रणीतोदकमीशान्यां दिशि॥ पवित्रे अग्नौ प्रक्षिप्य॥ ततस्तरणक्रमेण वर्हिरनु
स्याप्याज्येनाभिघार्य॥ ॐ देवा गातुविद इति मंत्रेण जुहोति इदमग्नये॥ इति वर्हिर्होमः॥
कर्मोपवर्गसमिध इति केचित् ब्रह्मणे पूर्णपात्रं॥ ॐ अद्य अमुकहोमकर्मणि कृता
कृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठासिद्ध्यर्थं इदं पूर्णपात्रं सद्रव्यं अमुकशर्मणे ब्राह्मणाय ब्र
ह्मणे तुभ्यमहं संप्रददे॥ ॐ स्वस्ति इति प्रतिगृह्णाति॥ अद्य अमुकशर्मा सांगतासि

२०

द्धर्थे यथासंख्याकान् भोजयिष्ये ॥ अाचार्याय वस्त्रयुग्मं यथाशक्तिदक्षिणां संप्रददे ॥ ऋत्
विग्भ्यश्च दक्षिणां दत्वा ॥ न्यूनातिरिक्तदोषपरिहारार्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं
विभज्य दातुमहमुत्सृजेत ॥ चतुर्भिश्च चतुर्भिश्च ॥ अस्य संग्रहमखस्य कर्मणो य
न्यूनमधिकं तत्सर्वं भवतां ब्राह्मणानां वचनात् ॥ विष्णोर्ग्रहणप्रसादात्सर्वो विधिः परिपूर्णो
ऽस्तु ॥ एतत्कर्मणि निर्विघ्नमस्तु गृहे ग्रहाः शान्तानि भवन्तु ॥ उत्तिष्ठ ब्रह्मणस्पते देवयन्त
स्त्वेमहे ॥ उपप्रयन्तु मरुतः सुदानव इन्द्रप्राशूर्भवा सचा ॥ यान्तु देवगणाः सर्वे पूजामादा
य पार्थिवः इष्टकामसमृध्यर्थं पुनरागमनाय च ॥ इति ग्रहान् विसर्जयेत् ॥ गच्छ गच्छ सु
रश्रेष्ठ स्वस्थाने परमेश्वरः यत्र ब्रह्मादयो देवा तत्र गच्छ हुताशनः ॥ इत्यग्निं विसृज्य ॥ त
तो यजमानं सपत्निकं सपुत्रं प्रागभिमुखोपवेश्य आचार्यस्त्विजस्वाहा कलशात्कुशदू

४१

वीमरुद्वैश्वदेवकमादाय अभिषिंचेयुः ॥ अभिषेके पत्नीवामतः ॥ आपो हि ष्ठा त्रिभिर्मं
त्रैः पंचैः पंचवारुणैः ॥ पुनंतु मेति नवभिर्भगप्रणेतरित्यपि १ समुद्राय त्वामंत्रेणा
इमापस्य चेतन च अग्निमीले पं घन घ आप्यायस्वेत्यनेन च २ देवस्य त्वा त्रिभिर्मंत्रैः शिरो
मे इति पंचभिः ॥ अभिषेकमंत्राः आपो हि ष्ठा १ यो वः २ तस्मा अरं ३ त्वा तार मि इ ४
वरुणस्योत्त ५ पुनंतु मा न वस्टकु ६ भगप्रणे ७ समुद्राय त्वा ८ इदमापः ९ अग्निमीले
[illegible] पं घन घ ११ आप्यायस्व १२ देवस्य त्वा० सरस्वत्यै भै० १२ देवस्य त्वा० सरस्वत्यै वाचो
यं० १३ देवस्य त्वा अश्विनोर्भैष० १४ शिरो मे श्रीर्यशः स्व० ५ ॥ सर्वे पवा० पालाशं भव
ति० यद्देवकल्या जुहोति ॥ पौराणिकामंत्राः ॥ शक्राद्या देवताः सर्वे ब्रह्मा विष्णु महे
श्वराः सुरास्त्वामभिषिंचंतु प्रयच्छंतु धनानि च नारायणो जगन्नाथस्तथा संकर्षणो

विभु: प्रद्युम्नश्चानिरुद्धश्च स्वस्तिदायकः सन्तु ते सदा ३ इन्द्रो वह्निर्यमश्चैव नैरृतो वरुण-
स्तथा वायुः कुबेरो रुद्रश्च दिक्पालाः पान्तु ते सदा ४ आदित्यश्चन्द्रमा भौमो बुधो जीवः सि-
तोऽर्कजः महाग्रहा अभिषिंचन्तु राहुकेतू तथैव च ५ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्ग-
णाः लोकपालाः प्रयच्छन्तु मंगलानि श्रियो यशः ५ नारदाद्याः ऋषिगणा ये चान्ये च तपोध-
ना भवन्तु यजमानस्य आशीर्वादपरायणाः ६ गायत्री चैव सावित्री शची लक्ष्मीः सरस्व-
ती॥ मातरः सर्वा भवन्तु वरदास्तव॥ ततः॥ ग्रहाणामादिरादित्यो लोकरक्षण-
कारकः॥ विषमस्थानसंभूतपीडां देहतु ते रविः॥१॥ भूमिपुत्रो महातेजा जगतो हि म-
शः सुधामूर्तिः सुधानेत्रः सुधाशनः विषमस्थानसंभूतपीडां देहतु ते विधुः॥२॥ भूमिपु-
त्रो महातेजा जगतां भयकृत्सदा वृष्टिकृद्वृष्टिहर्ता च पीडां देहतु ते कुजः॥३॥ उत्पातरू-

२२

८७

५८

पोजगतां चंद्रपुत्रोमहाद्युतिः सूर्यप्रियकरोविद्वान् पीडां हरतुतेबुधः ४ देवमंत्रीविशा।
लंमहालोकहितेतरः अनेकशिष्यैः संपूर्णः पीडां हरतु ते गुरुः ५ दैत्यमंत्री गुरुस्तेषा
प्राणदश्च महामतिः प्रभुस्ताराग्रहाणांच पीडां हरतुतेभृगुः ६ सूर्यपुत्रोदीर्घदेहोविशा
लाक्षः शिवप्रियः मंदचारः प्रसन्नात्मा पीडां हरतुतेशनिः ७ महाशिरोमहावक्त्रोदीर्घ
दंष्ट्रोमहाबलः अतनुश्चोर्ध्वकेशश्च पीडां हरतुतेतमः ८ अनेकवर्णोकेतुश्च शतसो।
थसहस्रशः उत्पातरूपोजगतां पीडां हरतुतेशिखी ९ इत्येतैरभिशिंचयुः॥ अमता
भिषेकोस्तु॥ ततकलशस्थापन पूर्वकस्वस्तिवाचनं कृत्वा तिलमाशीर्वादानकृत्वा यज
मानहस्तेदत्वा न इत्वा तत्र मंत्रः॥ मंत्रार्थाः सफलाः संतु पूर्णाः संतु मनोरथाः शत्रूणांबुद्धि
नाशोस्तु मित्राणामुदयस्तव १ ऋग्वेदोथयजुर्वेदः सामवेदो ह्यथर्वणः ब्रह्मवाक्यसदा

सत्येनश्रंपत्तु त्तव शात्रव: २ सर्वै कुशलिनः संतु सर्वैशंतु निरामयाः सर्वै भद्रान पश्यंतु मा
कश्चिद्दुःखमाप्नुयात २ धनवान पुत्रवानूलक्ष्मीवानायुष्मानुभव॥ इतिश्रीदग्निहोत्रीराव
लहरीशंकरसुनगणपतिविरचितेयं ग्रह शांतिपद्धतिः समाप्ता॥ ॥अथ विवाहे माणि
क्यस्तंभरोपणं॥ सूर्येगनासिंह घटे कुंभे वस्तंभो लिकोदंड़ स्मगे १० सुवायो॥ मीनाज कुंभेति
।स्तनौ विवाहेस्याप्योग्निकोणावृषयुग्मकर्के॥१॥ आचमनः प्राणायाम. अद्ये० ममसुत
स्यवासुतायाः उद्वाहकर्मणि अविघ्नेनकर्मणासिद्ध्यर्थं विवाहे रत्नस्तंभस्यारोपणपूज
नमहं करिष्ये॥ मावोरिषत्खनिताजस्मैचत्वाखनाम्यहं द्विपाच्चतुष्पादस्माकं ८ सर्वमस्त्वा
नातुरं॥ इति मंत्रेणगर्तं कृत्वा॥ स्योनापृथिवी १ मृत्तिकाबहिर्निष्काश्य धान्यमसी
धान्ययाः शालि निरिति फलं॥ हिरण्यगर्भेति हिरण्यं॥ हिंकारायस्वेति तैलं॥ ध्रुवा।सि

म२

फवो १ स्तंभरोपणं ॥ तदुपरि मृन्मयपात्रे गंधाक्षतमोदकादि संयुक्तं स्थापयेत् ॥ एतद
स्ते॰ मित्रे १ मनोजूतिरितिप्रतिष्ठा ॥ यदाबध्नेतिमिरलबंधनं ॥ रत्नस्तंभायनमः आवाहना
दि संपूज्य ॥ अथवा ॥ रत्नस्तंभायनमः गंधाद्युपचारान् समर्पयामि २ अद्यतिथौ स्तंभ
रोपणे यन्न्यूनमधिकं तत्परिपूर्णमस्तु ॥ इति रत्नस्तंभरोपणं ॥ शुभं भवतु ॥ २ ॥ अथा
हिरण्यदानं ॥ अत्राद्य॰ तिथौ अमुकगोत्रोत्पन्न अमुकशर्माहं मम सुतायाः विवाहकर्म
णः संगतासिद्ध्यर्थं वरप्रभृति अन्येभ्यो हिरण्यदानमहं करिष्ये १ मांजिष्ठवस्त्रकौसुंभवस्त्र
नानापट्टवस्त्रोपहाराणां पवित्रताकृते देशकालउपाहाररपाकपात्रद्रव्यभाण्डाः संप
न्नाः ॥ तत्राद्य॰ अमुकगो॰हं मम सुतायाः विवाह॰ इमानि वासांसि हस्तनिर्देवतानि
गंधपुष्पाद्यर्चितानि वरप्रभृतिनानागोत्रेभ्यो ब्राह्मणेभ्योहं संप्रददे ॥